प्रसक्तसंरोदनशोककोपा-
च्छिरोऽभिघातादतिमद्यपानात् ॥
तथा ऋतूनाञ्च विपर्य्ययेण
क्लेशाभिघातादतिमैथुनाच्च।
बाष्पग्रहात् सूक्ष्मनिरीक्षणाच्च
नेत्रे विकारान् जनयन्ति दोषाः ॥
वातात् पित्तात् कफाद्रक्तादभिष्यन्दश्चतुर्विधः।
प्रायेण जायते घोरः सर्व्वनेत्रामयाकरः ॥”
तस्य सम्प्राप्तिर्यथा,—
“निस्तोदनस्तम्भनरोमहर्ष-
संघर्षपारुष्यशिरोऽभितापाः।
विशुष्कभावः शिशिराश्रुता च
वाताभिपन्ने नयने भवन्ति ॥
दाहप्रपाकौ शिशिराभिनन्दा
धूमायनं वाष्पसमुच्छ्रयश्च।
उष्णाश्रुता पीतकनेत्रता च
पित्ताभिपन्ने नयने भवन्ति ॥
उष्णाभिनन्दा गुरुताक्षिशोथः
कण्डूपदेहावतिशीतता च।
स्रावो मुहुः पिच्छिल एव चापि
कफाभिपन्ने नयने भवन्ति ॥
ताम्राश्रुता लोहितनेत्रता च
राज्यः समन्तादतिलोहिताश्च।
पित्तस्य लिङ्गानि च यानि तानि
रक्ताभिपन्ने नयने भवन्ति ॥”
इति माधवकरः ॥
( अस्य निदानादिपूर्व्वकं लक्षणं चिकित्सा च यथा,—
“उष्णातिक्षारकटुकैरभिघातेन वा पुनः।
क्रुध्यत्स्वल्पेनापि दोषाः कुप्यन्ति नेत्रगाः ॥
सहजा ये परा तेषां वक्ष्यामि शृणु लक्षणम्।
रुजः कण्डूश्च तोदश्च शुष्कशीतास्रसन्ततिः।
वातिकं तं विजानीयात् पैत्तिकं शृणुतः परम् ॥
सरक्तदाहे नेत्रे च उष्णस्रावश्च पैत्तिके।
शोथकण्डूः सन्निपाते शीतनाक्षे कफात्मके ॥
द्वन्द्वजो मिश्रलिङ्गैश्च सर्व्वैस्तैः सान्निपातिकः।
एतद्धि लक्षणं ज्ञात्वा चोपचारं शृणुष्व मे ॥
शुण्ठी सुराह्वसरलाः सह काञ्जिकेन
चोष्णेन धावनमिदं सहपैत्तिके च।
श्लेष्मोद्भवे त्रिफलकल्कमिदं समूत्र-
मग्रेस्तथा कथितमत्रभिषग्वरैस्तत् ॥
शुण्ठी शटी च रजनी त्रिफला सनिम्बा
पत्राणि सैन्धवयुतानि तुषाम्बुकेन।
शस्तं वदन्ति नयने च ससन्निपाते
रक्तोद्भवे च तरुणे च तथा प्रशस्तम् ॥
फलत्रिकं दारु निशास्तु धूमो
वचास्तु वर्षाभवसैन्धवेन।
प्रलेपनं श्लेष्मभवे विकारे
सवातिके वा हितमेव शस्तम् ॥
शुण्ठी सैन्धवतक्रेण ताम्रभाण्डे विघर्षितम्।
अपामार्गस्य मूलं वा मूलं धूस्तूरकस्य वा ॥
अञ्जनञ्च हितं तेषां वातनेत्रामयापहम् ॥
दुग्धोत्पन्नं नवनीतं यष्टीनिम्बस्त्रिकाञ्च
संयोज्याः।
त्रिफला गुडसंयुक्ता लेपनं कफनेत्रजरोगघ्नम् ॥
शुण्ठी सैन्धवतुल्यं मागधिका ताम्रभाजने घृष्टम्।
दध्ना हतैनाञ्जनकं निहन्ति सर्व्वांश्च नेत्रगदान् ॥
वातपित्तकफदोषसम्भवान्
नेत्रयोर्बहुपीडनं सगात्।
एक एव हरति प्रयोजितः
शिग्रुपल्लवरसः समाक्षिकः ॥”
इति हारीते चिकित्सितस्थाने ४४ अध्यायः ॥)
नेत्ररोगहा, [ न् ] पुं, ( नेत्ररोगं हन्तीति। हन् + क्विप्।) वृश्चिकालीक्षुपः। इति राजनिर्घण्टः ॥ चक्षूरोगनाशके, त्रि ॥
नेत्रामयः, पुं, ( नेत्रस्य आमयो रोगः।) चक्षू-रोगः। तस्य निदानं यथा,—
“वातात् पित्तात् कफाद्रक्तादभिष्यन्दश्चतुर्विधः।
प्रायेण जायते घोरः सर्व्वनेत्रामयाकरः ॥”
इति माधवकरः ॥
( अस्य लक्षणं यथा,—
“अल्पाश्रुरागाऽनुपदेहता च
प्रस्यन्दतोदातिरुजश्च वातात्।
पित्तात्तु दाहार्त्ति रुजोऽतिरागाः
पीतोऽतिरेकः सुभृशोष्णमस्रु ॥
शुक्लोपदेहो बहुपिच्छिलास्रु
नेत्रं कफात् स्यात् गुरुता सकण्डूः।
सर्व्वाणि रूपाणि तु सन्निपाता
नेत्रामयाः षण्णवतिस्तु भेदात् ॥
तेषामभिव्यक्तिरभिप्रदिष्टा
शालाक्यतन्त्रेषु चिकित्सितञ्च।
पराधिकारे तु न विस्तरोक्तिः
शस्तेति तेनात्र न नः प्रयासः ॥”
इति चिकित्सितस्थाने षड्विंशतितमेऽध्याये चरकेणोक्तम् ॥)
नेत्राम्बु, क्ली, ( नेत्रस्य अम्बु जलम्।) अश्रु। इत्यमरः। २। ६। ९३ ॥
नेत्रारिः, पुं, (नेत्रस्य अरिः शत्रुः।) स्नुहीवृक्षः। इति राजनिर्घण्टः ॥
नेत्री, स्त्री, ( नीयतेऽनयेति। नी + “दाम्नी-शसेति।” ३। २। १८२। इति करणे ष्ट्रन्। षित्वात् ङीष्।) लक्ष्मीः। नाडी। इति शब्द-रत्नावली ॥ नदी। इति मेदिनी। रे, ५४ ॥ ( नयतीति। नी + तृच् + ङीप्।) प्रापय-कर्त्री ॥ ( शिक्षयित्री। इति नीलकण्ठः ॥ यथा, महाभारते। ५। १३६। १३।
“यस्य मे भवती नेत्री भविष्यद्भूतिदर्शिनी।”)
नेत्रोपमफलः, पुं, ( नेत्रोपमं नयनतुल्यं फलं यस्य।) वाताद:। इति भावप्रकाशः ॥ वादाम इति भाषा ॥
नेत्रौषधं, क्ली, (नेत्रस्य औषधम्।) पुष्पकासीसम्। इति राजनिर्घण्टः ॥ चक्षूरोगौषधमात्रञ्च ॥
नेत्रौषधी, स्त्री, ( नेत्रस्य औषधी।) अजशृङ्गी। इति रत्नमाला ॥ कोँआ इति भाषा ॥
नेदिष्ठं, त्रि, (अयमेषामतिशयेनान्तिकः। अन्तिक + “अतिशायने तमबिष्ठनौ।” ५। ३। ५५। इति इष्ठन्। “अन्तिकबाढयोर्नेदसाधौ।” ५। ३। ६३। इति नेदादेशः।) अन्तिकतमम्। अतिनिकटम्। इत्यमरः। ३। १। ६८ ॥ (यथा, ऋग्वेदे। ४। १। ५।
“स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ।”
यथा च, उद्धवसन्देशे। ३।
“सोत्कण्ठोऽभूदभिमतकथां संश्रितुं कंसभेत्री नेदिष्ठाय प्रणयलहरी बद्धवागुद्धवाय ॥”) निपुणम्। इति राजनिर्घण्टः ॥ अङ्कोटवृक्षे, पुं। इति जटाधरः ॥
नेदीयान्, [स्] त्रि, (अयमनयोरतिशयेनान्तिकः। अन्तिक + ईयसुन्। नेदादेशः।) नेदिष्ठः। अत्यन्तसमीपः। इति जटाधरः ॥ ( यथा, सर्व्व-दर्शनसंग्रहे आर्हतदर्शने।
“न चेदमिष्टापादनमैश्वर्य्यं दवीयान् महीधरो नेदीयान् दीर्घो बाहुरिति व्यवहारस्य निरा-बाधं जागरूकत्वात् ॥”)
नेपः, पुं, ( नयति प्रापयति शुभमिति। नी + “पानीविषिभ्यः पः।” उणा। ३। २३। इति पः।) पुरोहितः। उदकम्। इति संक्षिप्त-सारोणादिवृत्तिः ॥
नेपथ्यं, क्ली, ( नी + विच् + गुणः। नेः नेता तस्य पथ्यम्।) वेशः। इत्यमरः। २। ६। ९९ ॥ ( यथा, रघुः। १४। ९।
“राजेन्द्रनेपथ्यविधानशोभा
तस्योदितासीत् पुनरुक्तदोषा ॥”)
अलङ्कारः। रङ्गभूमिः। इति मेदिनी। ये, ८८ ॥ ( यथाह भरतः।
“वाक्यस्यार्थतया यत्र पात्रं नैव प्रवेश्यते।
नेपथ्यमिति प्राकाश्ये प्रयोज्यं तत्र नाटके ॥”)
नेपालः, पुं, स्वनामप्रसिद्धदेशः। इति जटाधरः ॥ ( यथा, शक्तिसङ्गमतन्त्रे।
“जटेश्वरं समारभ्य योगेशान्तं महेश्वरि !।
नेपालदेशो देवेशि ! साधकानां सुसिद्धिदः ॥”)
नेपालनिम्बः, पुं, ( नेपालोद्भवो निम्बः।) नेपाल-देशोद्भवनिम्बः। तत्पर्य्यायः। नेपालः २ ज्वर-निम्बः ३ ज्वरान्तकः ४ नाडीतिक्तः ५ निद्रारिः ६ सन्निपातरिपुः ७। अस्य गुणाः। शीतत्वम्। उष्णत्वम्। योगवाहित्वम्। लघुत्वम्। तिक्त-त्वम्। अतिकफपित्तास्रशोफतृष्णाज्वरापह-त्वञ्च। इति राजनिर्घण्टः ॥
नेपालिका, स्त्री, ( नेपालः उत्पत्तिस्थानत्वेना-स्त्यस्या इति। नेपाल + ठन् + टाप्।) मनः-शिला। इति राजनिर्घण्टः ॥
नेमः, पुं, ( नयतीति। नी + “अर्त्तिस्तुसुहु” इति। उणा। १। १३९। इति मन्।) कालः। अवधिः। खण्डम्। प्राकारः। कैतवम्। इति मेदिनी। मे, १८ ॥ अर्द्धम्। गर्त्तः। इति हेम-चन्द्रः। ६। ७० ॥ नाम्यादिः। अन्यः। इति